# Shri Natarajarajapanchavarana Stotram

# શ્રીનટરાજરાજપઞ્ચાવરણસ્તોત્રમ્

## Document Information

Text title : Shri Natarajarajapanchavarana Stotram

File name : naTarAjarAjapanchAvaraNastotraM.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીનટરાજરાજપઞ્ચાવરણસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીચિત્સભેશાય નમઃ ।
॥ શ્રીચિત્સભાધ્યાનમ્ ॥

વામાદ્યા નવશક્તયો યદુપરિ શ્રીસ્વર્ણકુમ્ભાનવૈ-
વાસ્યાં ચિન્મયસંસદિ પ્રતનુતે નૃત્તં નટેશઃ સદા ।
તદ્વામે નગજા રહસ્યમપિ તદ્દક્ષેઽસ્તિ ચૈદમ્બરં
શ્રીવ્યાઘ્રાઙ્ઘ્રિપતઞ્જલી મુનિવરૌ તત્પાર્શ્વયોઃ સંસ્થિતૌ ॥ ૧॥

॥ શ્રીરહસ્યધ્યાનમ્ ॥

શ્રીચક્રાદિવિશેષયન્ત્રઘટિતં ભિત્તિસ્વરૂપં સદાઽઽ-
નન્દજ્ઞાનમયં નટેશશિવયોઃ સમ્મેલનં બોધયત્ ।
શ્રીજામ્બૂનદબિલ્વપત્રરચિતૈર્માલાગણૈર્લક્ષિતં
કસ્તૂરીમસૃણં ચિદમ્બરમિદં સ્થાનં રહસ્યં નુમઃ ॥ ૨॥

॥ નવ ચક્રાણિ ॥

શ્રીચક્રં શિવચક્રં ચ ધ્વનિચક્રં ચ તાણ્ડવમ્ ।
સમ્મેલનં શ્રીલલિતાચક્રં ચિન્તામણેસ્તથા ।
ગણેશસ્કન્દયોશ્ચૈવ ચક્રં જ્ઞેયં નવાત્મકમ્ ॥ ૩॥

॥ શ્રીનટરાજરાજમૂર્તિધ્યાનમ્ ॥

સપ્તાર્ણવપરિક્ષેપાં દ્વીપૈસ્સપ્તભિરાવૃતામ્ ।
પઞ્ચાશત્કોટિવિસ્તીર્ણાં ધ્યાયેત્સર્વાં સભાં મહીમ્ ॥ ૪॥

તસ્યાશ્ચ હૃદયામ્ભોજે માતૃકાક્ષરકેસરમ્ ।
ધ્યાયેદષ્ટદલં ધીમાન્ મહીહૃદયપઙ્કજમ્ ॥ ૫॥

તસ્ય મધ્યે ત્રિકોણે તુ તરુણેન્દુ શિખામણિમ્ ।

ચારુદીર્ઘજટાપાશં ચલદ્ભોગીન્દ્રકુણ્ડલમ્ ॥ ૬॥

ત્રિપુણ્ડ્રવિલસત્ભાલં ચન્દ્રાર્કાનલલોચનમ્ ।
વામભાગે સ્થિતાં દેવી લક્ષયન્તમપાઙ્ગતઃ ॥ ૭॥

અધરોલ્લઙ્ઘનાકારસન્દિહાનસ્મિતાઙ્કુરમ્ ।
કસ્તૂરિકાસિતોદ્દામકાલકૂટલસદ્ગલમ્ ॥ ૮॥

મહાડમરુકામોર્ધ્વદક્ષપાણિસરોરુહમ્ ।
તદન્યકરપદ્માન્તર્જ્વલદુચ્છિખપાવકમ્ ॥ ૯॥

દક્ષાધઃ કરપદ્મેન હરન્તં પ્રાણિનાં ભયમ્ ।
વિક્ષિપ્તાન્યકરં તિર્યક્ કુઞ્ચિતેનાઙ્ઘ્રિણા સ્વયમ્ ॥ ૧૦॥

વામેતરપ્રકોષ્ઠાન્તનૃત્યત્ફણધરેશ્વરમ્ ।
કલ્પબ્રહ્મકપાલાનાં માલયા લમ્બમાનયા ॥ ૧૧॥

સ્વાતન્ત્ર્યમાત્મનો રૂપં આચક્ષાણં સ્વભાવતઃ ।
વ્યાઘ્ર ચર્માંમ્બરધરં કટિસૂત્રિત પન્નગમ્ ॥ ૧૨॥

દક્ષપાદાબ્જવિન્યાસાત્ અધઃ કૃતતમોગુણમ્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગં પરમાનન્દતાણ્ડવમ્ ।
એવં ધ્યાયેત્ પરેશાનં પુણ્ડરીકપુરેશ્વરમ્ ॥ ૧૩॥

॥ શ્રીશિવકામસુન્દરીધ્યાનમ્ ॥

તતસ્સ્વર્ણનિભાં દેવીં વિદ્યુલ્લેખેવ ભાસ્વરામ્ ।
નીવારશૂકવત્તન્વીં પીતાં ભાસ્વત્તનૂપમામ્ ॥ ૧૪॥

સ્વેચ્છાપઙ્કજમધ્યસ્થાં સ્વેચ્છાકલ્પિતવિગ્રહામ્ ।
સદ્વિનેત્રાં ચતુર્હસ્તાં મધ્યે સૂક્ષ્માં સ્તનોન્નતામ્ ॥ ૧૫॥

નિતમ્બતટવિસ્તીર્ણાં શ્યામાં નીલાલકાન્વિતામ્ ।
હારકેયૂરરશનામેખલાદ્યુપશોભિતામ્ ॥ ૧૬॥

સ્ફુરન્મકુટમાણિક્યકિઙ્કિણીરવશોભિતામ્ ।
દુકૂલવસનોપેતાં કિઞ્ચિત્પ્રહસિતાનનામ્ ॥ ૧૭॥

અનૌપમ્યગુણાં સૌમ્યાં મહાસાત્વિકરૂપિણીમ્ ।
દક્ષિણોર્ધ્વકરાબ્જેન ચાક્ષમાલાધરાં શિવામ્ ॥ ૧૮॥

વામેનોર્ધ્વકરાબ્જેન શુકવત્સધરાં પરામ્ ।
દક્ષાધઃકરપદ્મેન ફુલ્લકલ્હારધારિણીમ્ ॥ ૧૯॥

લમ્બિતાન્યકરાબ્જેન કટિદેશે સમન્વિતામ્ ।
બ્રહ્મવિષ્ણ્વિન્દ્રમકુટૈઃ સન્ઘર્ષિતપદામ્બુજામ્ ।
એવં ધ્યાયેત્ પરેશાનીં પુણ્ડરીક પુરેશ્વરીમ્ ॥ ૨૦॥

॥ શ્રીનટેશપ્રથમાવરણદેવતાસ્તોત્રમ્ ॥

પઞ્ચ બ્રહ્મદેવતાઃ -
ૐ અઘોરાયનમઃ । ૐ ઈશાનાય નમઃ । ૐ તત્પુરુષાય નમઃ ।
ૐ વામદેવાય નમઃ । ૐ સદ્યોજાતાય નમઃ ।
ૐ અઘોરાય નમઃ ॥

અઘોરમઞ્જનાભાસં દધતં વહ્નિડિણ્ડિમૌ ।
વરાભયકરં દંષ્ટ્રાભીમવક્ત્રં મહોજ્જ્વલમ્ ॥ ૨૧॥

નીલવસ્ત્ર પરિતાઙ્ગં નીલોત્પલવિભૂષિતમ્ ।
જ્વાલાકેશોગ્રરૂપં ચ સોષ્ણીષં યજ્ઞસૂત્રકમ્ ॥ ૨૨॥

ભસ્મરુદ્રાક્ષશોભાઢ્યં વીરમાસનસંસ્થિતમ્ ।
મૌલૌચન્દ્રધરં શ્યામં કુણ્ડલાલઙ્કૃતં પરમ્ ॥ ૨૩॥

બભ્રૂશ્મશ્રૂશિરોજં ચ દંષ્ટ્રાલં વિકૃતાનનમ્ ।
કપાલમાલાભરણં સર્પવૃશ્ચિક ભૂષણમ્ ॥ ૨૪॥

ખટ્વાઙ્ગકં કપાલં ચ ખેટકં પાશમેવ ચ ।
વામહસ્ત ચતુષ્કે તુ દક્ષહસ્ત ચતુષ્ટયે ॥ ૨૫॥

ત્રિશૂલં પરશું ખડ્ગં દણ્ડઞ્ચારિવિમર્દનમ્ ।
દેવં નવામ્બુદાભાસં અઘોરં સર્વકામદમ્ ।
યસ્માત્પરં ન ઘોરોઽન્યઃ તં નમામિ મહેશ્વરમ્ ॥ ૨૬॥

કાલાભ્રભ્રમરાઞ્જનદ્યુતિનિભં વ્યાવૃત્તપિઙ્ગેક્ષણં
કર્ણોદ્ભાસિતભોગિમસ્તકમણિપ્રોદ્ભિન્નદંષ્ટ્રાઙ્કુરમ્ ।
સર્પપ્રોતકપાલશુક્તિશકલવ્યાકીર્ણતાશેખરં
વન્દે દક્ષિણમીશ્વરસ્ય વદનં ચાથર્વનાદોદયમ્ ॥ ૨૭॥

કુઠારખેટાઙ્કુશ શૂલઢક્કારુદ્રાક્ષમાલાગ્નિવરાન્ દધાનઃ ।

ચતુર્મુખો નીલરુચિસ્ત્રિણેત્રઃ પાયાદઘોરો દિશિ દક્ષિણસ્યામ્ ॥ ૨૮॥

૨. ૐ ઈશાનાય નમઃ ।
શુદ્ધસ્ફટિકસઙ્કાશં શુભવક્ત્રં ત્રિલોચનમ્ ।
સાભયં વરદં ચૈવ વજ્રશૂલધરં શિવમ્ ॥ ૨૯॥

શ્વેતવસ્ત્રપરીતાઙ્ગં શ્વેતમાલ્યૈર્વિભૂષિતમ્ ।
રુદ્રાક્ષમાલાભરણં ત્રિપુણ્ડ્રાદ્યુપશોભિતમ્ ॥ ૩૦॥

યજ્ઞસૂત્રસમાયુક્તં શ્વેતોષ્ણીષવિરાજિતમ્ ।
નાગાભરણસંયુક્તં ઊર્ધ્વમીશાનકં સ્મરેત્ ॥ ૩૧॥

સ્ફટિકાભં જગદ્ધેતું ત્રિણેત્રં ચન્દ્રમૌલિનમ્ ।
સૌમ્યં પ્રસન્નમીશાનં ત્રિશૂલાભયધારિણમ્ ।
વન્દે સમસ્તલોકસ્ય કારણં પરમેશ્વરમ્ ॥ ૩૨॥

વ્યક્તાવ્યક્તનિરૂપિતં ચ પરમં ષટ્ત્રિંશતત્ત્વાધિકં
તસ્માદુત્તરતત્ત્વમક્ષરમિતિ ધ્યેયં સદા યોગિભિઃ ।
ઓઙ્કારાદિસમસ્તમન્ત્રજનકં સૂક્ષ્માતિસૂક્ષ્મં પરં
વન્દે પઞ્ચમમીશ્વરસ્ય વદનં ખવ્યાપિ તેજોમયમ્ ॥ ૩૩॥

વેદાભયેષ્ટાઙ્કુશ ટઙ્કપાશકપાલઢક્કાક્ષરશૂલપાણિઃ ।
સિતદ્યુતિઃ પઞ્ચમુખોઽવતાન્માં ઈશાન ઊર્ધ્વં પરમપ્રકાશઃ ॥ ૩૪॥

૩. ૐ તત્પુરુષાય નમઃ ।
પુરુષં કુઙ્કુમાકારં વરદાભીતિહસ્તકમ્ ।
ખડ્ગ પરશુસંયુક્તં જટામકુટશોભિતમ્ ॥ ૩૫॥

રક્તવસ્ત્રપરીતાઙ્ગં સોષ્ણીષયજ્ઞસૂત્રકમ્ ।
પ્રસન્નવદનં સૌમ્યં રક્તપદ્મોપશોભિતમ્ ॥ ૩૬॥

નેત્રત્રયસમાયુક્તં પૂર્વાસ્યં ચ ચતુર્મુખમ્ ।
સર્વાભીષ્ટપ્રદં વન્દે સર્વદા સુખદાયકમ્ ॥ ૩૭॥

સ્ફટિકાભં જગદ્ધેતું ત્રિનેત્રં ચન્દ્રમૌલિનમ્ ।
ભજે તત્પુરુષં કાન્તં ત્રિશૂલાભયધારિણમ્ ॥ ૩૮॥

સંવર્તાગ્નિતટિત્પ્રદીપ્તકનકપ્રસ્પર્ધિતેજોઽરુણં
ગમ્ભીરધ્વનિસામવેદજનકં તામ્રાધરં સુન્દરમ્ ।

અર્ધેન્દુદ્યુતિલોલપિઙ્ગલજટાભારપ્રબદ્ધોદકં
 વન્દે સિદ્ધસુરાસુરેન્દ્રનમિતં પૂર્વં મુખં શૂલિનઃ ॥ ૩૯॥

પ્રદીપ્તવિદ્યુત્કનકાવભાસો વિદ્યાવરાભીતિકુઠારપાણિઃ ।
ચતુર્મુખસ્તત્પુરુષસ્ત્રિણેત્રઃ પ્રાચ્યાં સ્થિતો રક્ષતુ મામજસ્રમ્ ॥ ૪૦॥

૪. ૐ વામદેવાય નમઃ ।
વામદેવ મહાદેવં વરદાભયહસ્તકમ્ ।
નાગઘણ્ટારવોપેતં રક્તાઙ્ગં રક્તલોચનમ્ ॥ ૪૧॥

ભસ્મરુદ્રાક્ષશોભાઢ્યં યજ્ઞસૂત્રવિરાજિતમ્ ।
તુઙ્ગનાસં ચ સોષ્ણીષં મન્દહાસમુખાન્વિતમ્ ॥ ૪૨॥

રક્તપદ્માસનાસીનં માલ્યવસ્ત્રોપશોભિતમ્ ।
વન્દે વાઞ્છિતલાભાય સર્વાભીષ્ટફલપ્રદમ્ ॥ ૪૩॥

વામદેવં સુરક્તાભં માલ્યવસ્ત્રોપવીતકમ્ ।
ધ્યાયેત્ શિવં શિવાનાથં ખડ્ગખેટકધારિણમ્ ॥ ૪૪॥

ગૌરં કુઙ્કુમપઙ્કિલં સુતિલકં આપાણ્ડુગણ્ડસ્થલં
 ભ્રૂવિક્ષેપકટાક્ષવીક્ષણલસત્સંસક્તકર્ણોત્પલમ્ ।
સ્નિગ્ધં બિમ્બફલાધરં પ્રહસિતં નીલાલકાલઙ્કૃતં
 વન્દે યાજુષવેદઘોષજનકં વક્ત્રં હરસ્યોત્તરમ્ ॥ ૪૫॥

વરાક્ષમાલાઽભયટઙ્કહસ્તઃ સરોજકિઞ્જલ્કસમાનવર્ણઃ ।
ત્રિલોચનઃ ચારુ ચતુર્મુખો માં પાયાદુદીચ્યાં દિશિ વામદેવઃ ॥ ૪૬॥

૫. ॥ ૐ સદ્યોજાતાય નમઃ ॥

સદ્યોજાતં ચ ગોક્ષીરસઙ્કાશમતિસુન્દરમ્ ।
વરદાભયહસ્તં ચ પાશાઙ્કુશધરં શિવમ્ ॥ ૪૭॥

યજ્ઞસૂત્રસમાયુક્તં ભસ્મરુદ્રાક્ષભૂષિતમ્ ।
સિતસ્રગ્ગન્ધભૂષાઢ્યં સિતોષ્ણીષં સિતામ્બરમ્ ॥ ૪૮॥

સૌમ્યં મૌલીન્દુસમ્પન્નં બાલાકારં ત્રિલોચનમ્ ।
સર્વલક્ષણસમ્પન્નં સદ્યોજાતં વિભાવયે ॥ ૪૯॥

સદ્યોજાતં મહાદેવં ઋગ્વેદપ્રિયમીશ્વરમ્ ।
સર્વલક્ષણસમ્પન્નં શિવયા સહિતં ભજે ॥ ૫૦॥

પ્રાલેયામલમિન્દુકુન્દધવલં ગોક્ષીરફેનપ્રભં
ભસ્માભ્યઙ્ગમનઙ્ગદેહદહનજ્વાલાવલીલોચનમ્ ।
વિષ્ણુબ્રહ્મમરુદ્ગણાર્ચિતપદં ચર્ગ્વેદનાદોદયં
વન્દેઽહં સકલં કલઙ્કરહિતં સ્થાણોર્મુખં પશ્ચિમમ્ ॥ ૫૧॥

કુન્દેન્દુશઙ્ખસ્ફટિકાવભાસો વેદાક્ષમાલાવરદાભયાઙ્કઃ ।
ત્ર્યક્ષશ્ચતુર્વક્ત્ર ઉરુપ્રતાપઃ સદ્યોઽધિજાતોઽવતુ માં પ્રતીચ્યામ્ ॥ ૫૨॥

અઙ્ગન્યાસદેવતાઃ
ૐ અસ્રાય નમઃ । ૐ કવચાય નમઃ । ૐ નેત્રત્રયાય નમઃ ।
ૐ શિખાયૈ નમઃ । ૐ શિરસે નમઃ । ૐ હૃદયાય નમઃ ।
૧. ૐ અસ્ત્રાય નમઃ ।
સમ્પ્રોક્તા અસવઃ પ્રાણાઃ ત્રાયતે હિ ચ તાન્ સદા ।
પ્રાણાનાં ત્રાણહેતોશ્ચ અસ્ત્રમિત્યભિધીયતે ॥ ૫૩॥

યજ્ઞસ્ય રક્ષણાર્થાય વિઘ્નવિધ્વંસનાય ચ ।
અશુધ્દ શુધ્દકરણાયાસ્ત્રમદ્ય નમામ્યહમ્ ॥ ૫૪॥

શુધ્દસ્ફટિકસઙ્કાશં પઞ્ચવક્ત્રં સસોમકમ્ ।
વક્ત્રે વક્ત્રે ત્રિણેત્રં ચ દશબાહું સુશોભિતમ્ ॥ ૫૫॥

દુકૂલાભરણોપેતં ભસ્મરુદ્રાક્ષભૂષિતમ્ ।
લસન્મૌક્તિકસઙ્કાશં જટામકુટશોભિતમ્ ।
દન્તપઙ્ક્તિલસદ્વક્ત્રં સૌમ્યમસ્ત્રં ભજામ્યહમ્ ॥ ૫૬॥

વિનાસ્ત્રરાજં ન શિવસ્ય યાત્રા વિનાસ્ત્રરાજં ન ચ મજ્જનાદિ ।
વિનાસ્ત્રરાજં ન મહો ભવસ્ય તમસ્ત્રરાજં પ્રણમામિ મૂર્ધ્ના ॥ ૫૭॥

૨. ૐ કવચાય નમઃ
કવચં હૃદયત્રાણં અસ્ત્રશસ્ત્રનિવારકમ્ ।
અલઙ્કારાય સન્ધાર્યં કવચં સમુદાહૃતમ્ ॥ ૫૮॥

તસ્માત્તદ્ધ્યાનતઃ સર્વરક્ષા ભવતિ સર્વદા ।
કવચં શુભ્રવર્ણં ચ એકવક્ત્રં ચતુર્ભુજમ્ ॥ ૫૯॥

વરં કપાલં વામે ચાભયં શૂલં ચ દક્ષિણે ।
બિભ્રાણં શૂલનેત્રં ચ ભસ્મરુદ્રાક્ષભૂષિતમ્ ।
સર્વાભરણસંયુક્તં વન્દે માલાસુશોભિતમ્ ॥ ૬૦॥

૩. ૐ નેત્રત્રયાય નમઃ
સૂર્યાચન્દ્રમસૌ વહ્નિઃ શિવનેત્રત્રયં સ્મૃતમ્ ।
તસ્માન્નેત્રત્રયં પ્રોક્તં તદ્ધ્યાનં ચ પ્રકીર્તિતમ્ ॥ ૬૧॥

તેન નેત્રપ્રકાશઃ સ્યાત્ કાણત્વં ચ નિવર્તતે ।
નિર્મલં નેત્રરૂપં ચ નિત્યં શ્યામાબ્જસન્નિભમ્ ॥ ૬૨॥

એકાસ્યં ચ ત્રિશૂલાહી હસ્તયોર્દધતં શુભમ્ ।
શ્યામવસ્ત્રપરીધાનં નીલોત્પલવિભૂષિતમ્ ॥ ૬૩॥

સૌમ્યાસ્યં સૌમ્યરૂપં ચ સોમવત્પ્રિયદર્શનમ્ ।
નીલમેઘસમાકારં દૃક્ક્રિયેચ્છાત્મકં વિભોઃ ॥ ૬૪॥

ત્રિતત્ત્વરૂપવહ્ન્યાદિમણ્ડલત્રિતયાક્ષયમ્ ।
વન્દેઽહમિષ્ટલાભાય જગન્નેતૃત્વલક્ષિતમ્ ॥ ૬૫॥

૪. ૐ શિખાયૈ નમઃ ।
વામદેવાધિદૈવત્યા શિખા પ્રોક્તા સદાશિવા ।
અલઙ્કારશતૈર્યુક્તા કપર્દ ઇતિ ચ સ્મૃતા ॥ ૬૬॥

સા બ્રહ્મણાપિ ન જ્ઞાતા આકાશગમનેન ચ ।
તસ્માત્સર્વોત્તમા ધ્યેયા શિખાવાન્પુરુષો વિભુઃ ॥ ૬૭॥

શિખાં સિન્દૂરવર્ણાભાં શુક્લવસ્ત્રોત્તરીયકામ્ ।
ત્રિનેત્રાં જટિલાં સવ્યે કપાલં વરમેવ ચ ॥ ૬૮॥

શૂલાભયં દધાનાં ચ વામે રુદ્રાક્ષભૂષિતામ્ ।
વન્દેઽહં સર્વલાભાય ઉષ્ણીષસહિતાં શિવામ્ ॥ ૬૯॥

૫. ૐ શિરસે નમઃ ।
દ્વાદશાન્તમિતિ પ્રોક્તં શિર એવ સનાતનમ્ ।
સહસ્રાધિકનાડીનાં સમુદાયોઽત્ર વર્તતે ॥ ૭૦॥

શિરઃ પ્રધાનં સર્વેષુ અઙ્ગેષુ પરિકીર્તિતમ્ ।
ગઙ્ગાપન્નગચન્દ્રાશ્ચ શિવસ્ય શિરસિ સ્થિતાઃ ॥ ૭૧॥

એવં ધ્યેયં શિરઃસ્થાનં સર્વાધારં ચ કીર્તિતમ્ ।
મહાદેવાધિદૈવત્યં શિર એતદુદાહૃતમ્ ॥ ૭૨॥

શિરઃ કાઞ્ચનવર્ણાભં એકવક્ત્રં ત્રિલોચનમ્ ।

વરં કપાલં વામે ચ દક્ષે શૂલાભયે વરે ॥ ૭૩॥

જટામકુટશોભાઢ્યં ભસ્મપાણ્ડરવિગ્રહમ્ ।
સર્વાભરણસંયુક્તં સર્વમાલ્યૈરલઙ્કૃતમ્ ।
ભજે મઙ્ગલસમ્પ્રાપ્ત્યૈ સર્વશ્રેષ્ઠં પુરાતનમ્ ॥ ૭૪॥

૬. ૐ હૃદયાય નમઃ ।
હૃદિ અયં ઇતિ પ્રોક્તઃ શિવ એવ સનાતનઃ ।
શતં ચૈકા હૃદયસ્ય નાડ્યઃ તાસાં મૂર્ધાનમભિનિસ્સૃતૈકા ॥ ૭૫॥

દેહમધ્યસ્થિતં હ્યેતત્ જીવાધારમિતિ સ્મૃતમ્ ।
જીવો બ્રહ્મૈવ નાપરઃ પરમાત્મેત્યુદાહૃતઃ ॥ ૭૬॥

પરમં ચ રહસ્યં ચ બોધયત્ એતદેવ હિ ।
હૃદયં શિવદૈવત્યં ઇતિ મન્ત્રેણ કીર્તિતમ્ ॥ ૭૭॥

એવં ચ હૃદયં ધ્યેયં ધ્યાનાવસ્થિતચેતસા ।
હૃદયં શુક્લવર્ણાભં ત્રિણેત્રં ચૈકવક્ત્રકમ્ ।
શૂલાભયે સવ્યહસ્તે દક્ષે વરકપાલકે ॥ ૭૮॥

કદલીપુષ્પસઙ્કાશં હૃદયં સર્વદેહિનામ્ ।
તસ્ય મધ્યસ્થિતં પદ્મં અષ્ટપત્રં સકર્ણિકમ્ ॥ ૭૯॥

વિતસ્તિમાત્રં હૃદયં કમલં ચતુરઙ્ગુલમ્ ।
અષ્ટાઙ્ગુલપ્રમાણાન્તં નાભેરૂર્ધ્વં વ્યવસ્થિતમ્ ॥ ૮૦॥

પદ્મનાલં નવદ્વારં સમન્તાત્ કણ્ટકાન્વિતમ્ ।
અઙ્ગુષ્ઠપર્વતુલ્યાઽત્ર કર્ણિકા સા સકેસરા ॥ ૮૧॥

કર્ણિકાયાં ભવેત્સૂર્યઃ તસ્ય મધ્યે તુ ચન્દ્રમાઃ ।
ચન્દ્રમધ્યે ભવેદ્વહ્નિઃ સૌરે ચાનાહતં સ્મરેત્ ॥ ૮૨॥

અમનસ્કં ચ સોમે ચ શિવમગ્નૌ વિભાવયેત્ ।
પૂજાહોમસમાધીનાં ત્રિવિધં મૂર્તિભેદકમ્ ॥ ૮૩॥

અનાહતશિવે પૂજા અમનસ્કશિવં હુનેત્ ।
શિવે વિલીનકં કૃત્વા સમાધિં પરિભાવયેત્ ॥ ૮૪॥

॥ દ્વિતીયાવરણદેવતાધ્યાનમ્ ॥

ૐ અનન્તાય નમઃ । ૐ એકનેત્રાય નમઃ । ૐ એકરુદ્રાય નમઃ ।

ૐ ત્રિમૂર્તયે નમઃ । ૐ શિખણ્ડિને નમઃ । ૐ શિવોત્તમાય નમઃ ।
ૐ શ્રીકણ્ઠાય નમઃ । ૐ સૂક્ષ્માય નમઃ ।
૧. ૐ અનન્તાય નમઃ ।
અનન્તેશં ચતુર્વક્ત્રં જટામકુટમણ્ડિતમ્ ।
ખણ્ડેન્દુમૌલિનં ગઙ્ગાધરં પદ્માસનસ્થિતમ્ ॥ ૮૫॥

ખડ્ગખેટધનુર્બાણકમણ્ડલ્વક્ષસૂત્રકાન્ ।
વરાભયે ચ બિભ્રાણં ભસ્મરુદ્રાક્ષભૂષિતમ્ ॥ ૮૬॥

૨. ૐ એકનેત્રાય નમઃ ।
ભૃઙ્ગાભમેકનેત્રં ચ સાક્ષમાલાકમણ્ડલુમ્ ।
ખડ્ગખેટધનુર્બાણવરદાભયશૂલકમ્ ॥ ૮૭॥

ઇન્દુગઙ્ગાધરં દેવં પ્રસન્નવદનાન્વિતમ્ ।
સર્વાભરણસંયુક્તં પઙ્કજોપરિ સંસ્થિતમ્ ॥ ૮૮॥

૩. ૐ એકરુદ્રાય નમઃ ।
એકરુદ્રં શશાઙ્કાભં ગઙ્ગાચન્દ્રકલાધરમ્ ।
ખડ્ગખેટધનુર્બાણાનક્ષમાલાં કમણ્ડલુમ્ ॥ ૮૯॥

પાશં શૂલં ચ બિભ્રાણં મન્દસ્મિતમનોહરમ્ ।
સર્વાભરણસંયુક્તં ભસ્મરુદ્રાક્ષશોભિતમ્ ॥ ૯૦॥

૪. ૐ ત્રિમૂર્તયે નમઃ ।
હિમાઙ્ગઞ્ચ ત્રિમૂર્તિશ્ચ જટામકુટશોભિતમ્ ।
અભયાક્ષવરાન્ ખડ્ગં ધનુર્બાણઞ્ચ ખેટકમ્ ।
ગણ્ડિકાઞ્ચ તથા શૂલં દધાનં પદ્મસંસ્થિતમ્ ॥ ૯૧॥

૫. ૐ શિખણ્ડિને નમઃ ।
શિખણ્ડિનં શુભ્રવર્ણં ખડ્ગખેટકસંયુતમ્ ।
ધનુર્બાણસમાયુક્તં વરાભયસમન્વિતમ્ ।
અક્ષશૂલધરઞ્ચૈવ ભસ્મરુદ્રાક્ષભૂષિતમ્ ॥ ૯૨॥

૬. ૐ શિવોત્તમાય નમઃ ।
શિવોત્તમં નીલવર્ણં ગઙ્ગાચન્દ્રજટાધરમ્ ।
ચાપબાણવરાભીતિખડ્ગખેટાક્ષશૂલકાન્ ॥ ૯૩॥

પાણિપદ્મેષ્વાદધાનં પ્રસન્નાસ્યં ત્રિનેત્રકમ્ ।

પદ્માસને સમાસીનં સર્વાભરણભૂષિતમ્ ॥ ૯૪॥

૭. શ્રીકણ્ઠાય નમઃ ।
શ્રીકણ્ઠં રક્તવર્ણઞ્ચ ગઙ્ગાસોમજટાન્વિતમ્ ।
અભયાક્ષવરાસીંશ્ચ ખેટકં ચાપબાણકૌ ॥ ૯૫॥

શૂલં વહન્તં હસ્તેષુ કુણ્ડલાદ્યુપશોભિતમ્ ।
રક્તવસ્ત્રપરીતાઙ્ગં રક્તપદ્માસને સ્થિતમ્ ॥ ૯૬॥

૮. ૐ સૂક્ષ્માય નમઃ ।
રક્તાઙ્ગં સૂક્ષ્મદેહં ચ વરાભયકરાન્વિતમ્ ।
શૂલાક્ષગણ્ડિકાં ચૈવ ધનુર્બાણાસિધારિણમ્ ।
પદ્માસને સમાસીનં પદ્મમાલાવિભૂષિતમ્ ॥ ૯૭॥

॥ તૃતીયાવરણદેવતા ધ્યાનમ્ ॥

ૐ ચણ્ડેશ્વરાય નમઃ । ૐ ગૌર્યૈ નમઃ । ૐ નન્દિને નમઃ । ૐ ભૃઙ્ગિને
નમઃ । ૐ મહાકાલાય નમઃ । ૐ વિષ્ણવે નમઃ । ૐ વૃષભાય
નમઃ । ૐ ષણ્મુખાય નમઃ ।
૧. ૐ ચણ્ડેશ્વરાય નમઃ ।
ચણ્ડેશ્વરઃ સ્થાણુસમાનતેજાઃ
રુદ્રેણ સઙ્ક્ષિપ્તસમસ્તભારઃ ।
યસ્ય પ્રસાદાત્સફલા શિવાર્ચા
તં ચણ્ડિકેશં પ્રણમામિ દેવમ્ ॥ ૯૮॥

ચણ્ડેશ્વરં ચતુર્બાહું ચતુર્વક્ત્રં ત્રિલોચનમ્ ।
દધતં કમણ્ડલું શૂલં અક્ષસૂત્રં પરશ્વધમ્ ॥ ૯૯॥

મહોરગોપવીતાઢ્યં તન્નિર્વર્તિતકઙ્કણમ્ ।
વન્દે નવામ્બુદાભાસં સમયાદિનિયામકમ્ ॥ ૧૦૦॥

૨. ૐ ગૌર્યૈ નમઃ ।
ગૌરીં ચ સ્ફટિકાભાસાં પુણ્ડરીકદલેક્ષણામ્ ।
ત્રિણેત્રાં ચૈકવક્ત્રાં ચ સાભયાં વરદાન્વિતામ્ ॥ ૧૦૧॥

મૃગશૂલસમાયુક્તાં સર્વાભરણભૂષિતામ્ ।
સિંહોપરિ સ્થિતાં પીતાં કરણ્ડમકુટાન્વિતામ્ ।
દેવીં સદા પ્રપદ્યેઽહં મુક્તામાલાવિરાજિતામ્ ॥ ૧૦૨॥

૩. ૐ નન્દિને નમઃ ।
શૂલાક્ષમાલે દધતં કરાભ્યાં
 વામેતરાભ્યાં જટિલં ત્રિણેત્રમ્ ।
દ્વાર્દક્ષિણસ્થાં સમવાપ્ય શાખાં
 રક્તસ્મિતં નન્દિનમાશ્રયામિ ॥ ૧૦૩॥

ધર્મસ્ત્વં વૃષરૂપેણ જગદાનન્દકારકમ્ ।
અષ્ટમૂર્તેરધિષ્ઠાનં શિવતુલ્યં સનાતનમ્ ॥ ૧૦૪॥

ચામીકરાચલપ્રખ્યં સર્વાભરણભૂષિતમ્ ।
બાલેન્દુમકુટં સૌમ્યં ત્રિણેત્રં ચ ચતુર્ભુજમ્ ॥ ૧૦૫॥

મૃગવેત્રધરં દેવં ચન્દ્રનિમ્બસમાનનમ્ ।
સુયશાપતિમીશસ્ય ધ્યાનૈકનિરતં શુભમ્ ।
નમામિ પરયા ભક્ત્યા સર્વલોકૈરભિષ્ટુતમ્ ॥ ૧૦૬॥

૪. ૐ ભૃઙ્ગિને નમઃ ।
નિર્માંસવિગ્રહો ભૃઙ્ગી શ્વેતો દણ્ડાક્ષસૂત્રભૃત્ ।
નૃત્યન્ ત્રિણેત્રઃ સશિખઃ દેવાલોકનતત્પરઃ ॥ ૧૦૭॥

અર્ધનારીશ્વરશિવોરુમધ્યે ભ્રમરીકૃતઃ ।
પ્રદક્ષિણં શિવં કુર્વન્ અમ્બયા શાપિતઃ કિલ ॥ ૧૦૮॥

તસ્માત્ નિર્માંસદેહોઽભૂત્ શિવધ્યાનૈકનિશ્ચલઃ ।
તં વન્દે પરમેશાનભક્તવર્યં સનાતનમ્ ॥ ૧૦૯॥

૫. ૐ મહાકાલાય નમઃ ।
મહેશસવ્યસ્થિતકૃષ્ણવર્ણં નાગોપવીતં જટિલં ત્રિણેત્રમ્ ।
કપાલશૂલાન્વિતવામદક્ષકરં મહાકાલમહં પ્રપદ્યે ॥ ૧૧૦॥

ત્રિણેત્રં પીતકૃષ્ણાઙ્ગં બભ્રુશ્મશ્રુશિરોરુહમ્ ।
દણ્ડખડ્ગૌ ખેટશૂલે દધતં શિવરક્ષકમ્ ।
મહાકાલં મહાત્માનં પ્રણમામિ સદા મુદા ॥ ૧૧૧॥

૬. ૐ વિષ્ણવે નમઃ ।
વિષ્ણું ચતુર્ભુજં શઙ્ખગદાચક્રાબ્જહસ્તકમ્ ।
નીલામ્બુધરસઙ્કાશં ભસ્મોદ્ધૂલિતવિગ્રહમ્ ।
રમયા રમમાણં ચ જગદ્રક્ષકમાશ્રયે ॥ ૧૧૨॥

શ્રીમાન્ ક્ષીરાર્ણવાન્તઃ ફણિપતિ શયને ચન્દ્રખણ્ડાતિગૌરે
ભૂમાનીલાસમેતઃ સકલભુવન સંરક્ષણોપાયચિન્તઃ ।
નિદ્રાવ્યાજેન કુર્વન્ નિરવધિમહિમા નિત્યમુક્તાભિવન્દ્યઃ
શેતે યઃ શ્રીનિવાસઃ પ્રદિશતુ સુતરાં સન્તતં મઙ્ગલં નઃ ॥ ૧૧૩ ॥

૭. ૐ વૃષભાય નમઃ ।
રજતનિભશરીરં વેદપાદં ત્રિણેત્રં
અરુણમુદિતશોભં શ્યામમુન્નમ્રવક્ત્રમ્ ।
વિવિધમણિવિભૂષં કિઙ્કિણીશોભિકણ્ઠં
હરિહરવિધિરૂપં ચાદિદેવં વૃષેશમ્ ॥ ૧૧૪ ॥

વૃષં વૃષપતિં ત્ર્યક્ષં રુદ્રૈકગતમાનસમ્ ।
સાક્ષાત્ ધર્મસ્વરૂપં ચ શુદ્ધસ્ફટિકનિર્મલમ્ ।
વન્દે ચ શિવસેવાયૈ શિવાપરેતિ વિશ્રુતમ્ ॥ ૧૧૫ ॥

૮. ૐ ષણ્મુખાય નમઃ ।
ષડ્વક્ત્રં શિખિવાહનં ત્રિણયનં ચિત્રામ્બરાલઙ્કૃતં
વજ્રં શક્તિમસિં ત્રિશૂલમભયં ખેટં ધનુશ્ચક્રકમ્ ।
પાશં કુક્કુટમઙ્કુશં ચ વરદં દોર્ભિર્દધાનં સદા
વન્દે સિદ્ધિદમીશ્વરં શિવસુતં સ્કન્દં સુરારાધિતમ્ ॥ ૧૧૬ ॥

ઉમાકોમલહસ્તાબ્જ સમ્ભાવિતલલાટિકમ્ ।
મહાદેવગુરું વન્દે કુમારં પુષ્કરસ્રજમ્ ॥ ૧૧૭ ॥

॥ ચતુર્થાવરણદેવતા ધ્યાનમ્ ॥

ૐ અગ્નયે નમઃ । ૐ ઇન્દ્રાય નમઃ । ૐ ઈશાનાય નમઃ । ૐ કુબેરાય નમઃ ।
ૐ નિરૃતયે નમઃ । ૐ બ્રહ્મણે નમઃ । ૐ યમાય નમઃ ।
ૐ વરુણાય નમઃ । ૐ વાયવે નમઃ । ૐ વિષ્ણવે નમઃ ।
૧. ૐ અગ્નયે નમઃ ।
સપ્તાર્ચિષં ચ બિભ્રાણં અક્ષમાલાં કમણ્ડલુમ્ ।
જ્વાલામાલાકુલં રક્તં શક્તિહસ્તં અજાસનમ્ ॥ ૧૧૮ ॥

સ્વાહાદેવીસમાયુક્તં સ્વર્ણવર્ણમુપાસ્મહે ।
૨. ૐ ઇન્દ્રાય નમઃ ।
ઐરાવતગજારૂઢં શચીજાનિં કિરીટિનમ્ ॥ ૧૧૯ ॥

સહસ્રનયનં શક્રં વજ્રપાણિં વિભાવયે ।
૩. ૐ ઈશાનાય નમઃ ।
ઈશાનં વૃષભારૂઢં ત્રિશૂલવ્યાલધારિણમ્ ॥ ૧૨૦॥

પાર્વતીસ્કન્દવિઘ્નેશવીરભદ્રયુતં શિવમ્ ।
શરચ્ચન્દ્રનિભં વન્દે ચન્દ્રમૌલિં ત્રિલોચનમ્ ॥ ૧૨૧॥

૪. ૐ કુબેરાય નમઃ ।
કુબેરં મનુજાસીનં સખર્વં ખર્વવિગ્રહમ્ ।
પાર્વતીશસખં દેવં ચિત્રલેખાપતિં શુભમ્ ।
સ્વર્ણચ્છાયં ગદાહસ્તં ઉત્તરાશાપતિં સ્મરેત્ ॥ ૧૨૨॥

૫. ૐ નિરૃતયે નમઃ ।
રક્તનેત્રં શવારૂઢં નીલોત્પલ દલપ્રભમ્ ॥ ૧૨૩॥

કૃપાણપાણિમસ્રૌઘં પિબન્તં રાક્ષસેશ્વરમ્ ।
દીર્ઘદેવીસમાયુક્તં યાતુધાનમહં ભજે ।
૬. ૐ બ્રહ્મણે નમઃ ।
હંસારૂઢં ચતુર્વક્ત્રં સરસ્વતીપતિમવ્યયમ્ ।
રુદ્રાક્ષપુસ્તકાભીતિવરહસ્તં વિચિન્તયે ॥ ૧૨૪॥

૭. ૐ યમાય નમઃ ।
કૃતાન્તં મહિષારૂઢં દણ્ડહસ્તં ભયાનકમ્ ।
કાલપાશધરં કૃષ્ણં ધ્યાયેત્ દક્ષિણદિક્પતિમ્ ।
દેવ્યાં શ્યામલયા યુક્તં ધર્મરાજં મહાબલમ્ ॥ ૧૨૫॥

૮. ૐ વરુણાય નમઃ ।
નાગપાશધરં સૃષ્ટં રત્નૌઘદ્યુતિવિગ્રહમ્ ।
શશાઙ્કં ધવલં ધ્યાયેત્ વરુણં મકરાસનમ્ ।
કાલિકાપતિમીશાનં હૃદા ધ્યાયેત્ જલાધિપમ્ ॥ ૧૨૬॥

૯. ૐ વાયવે નમઃ ।
આપીત હરિતચ્છાયં વિલોલધ્વજધારિણમ્ ।
પ્રાણભૂતઞ્ચ ભૂતાનાં હરિણસ્થં સમીરણમ્ ।
અઞ્જનાપતિમીડ્યં ચ સદા સઞ્ચારિણં ભજે ॥ ૧૨૭॥

૧૦. ૐ મહાવિષ્ણવે નમઃ ॥

ગરુડારૂઢં મહાવિષ્ણું મહાલક્ષ્મીધવં હરિમ્ ।
શઙ્ખ ચક્રગદાપદ્મધરં વન્દે મનોહરમ્ ॥ ૧૨૮॥

॥ પઞ્ચમાવરણદેવતા ધ્યાનમ્ ॥

ૐ અઙ્કુશાય નમઃ । ૐ ખડ્ગાય નમઃ । ૐ ગદાયૈ નમઃ ।
ૐ ચક્રાય નમઃ । ૐ ત્રિશૂલાય નમઃ । ૐ દણ્ડાય નમઃ ।
ૐ પદ્માય નમઃ । ૐ પાશાય નમઃ । ૐ વજ્રાય નમઃ । ૐ શક્તયે નમઃ ।
૧. ૐ અઙ્કુશાય નમઃ ।
અઙ્કુશં પુરુષં પીતં દ્વિભુજં ચ દ્વિનેત્રકમ્ ।
કરણ્ડમકુટોપેતં ઈષદ્દંષ્ટ્રં કૃતાઞ્જલિમ્ ।
પુષ્પહસ્તં પુનીતં ચ ગજપ્રેરકમાશ્રયે ॥ ૧૨૯॥

૨. ૐ ખડ્ગાય નમઃ ।
ખડ્ગં ચ પુરુષં શ્યામં દ્વિભુજં ચ દ્વિનેત્રકમ્ ।
કરણ્ડમકુટોપેતં કિઞ્ચિત્ દંષ્ટ્રાસમન્વિતમ્ ।
વિષ્ણુહસ્તે વીરભદ્રકરે સંસ્થં નમામ્યહમ્ ॥ ૧૩૦॥

૩. ૐ ગદાયૈ નમઃ ।
દ્વિનેત્રાં દ્વિભુજાં નીલાં કરણ્ડમકુટાન્વિતામ્ ।
સર્વાભરણસંયુક્તાં ગદાં કર્ણાકૃતિં સ્મરેત્ ।
વિષ્ણુહસ્તે ભીમહસ્તે આઞ્જનેયકરે સ્થિતામ્ ॥ ૧૩૧॥

૪. ૐ ચક્રાય નમઃ ।
નવીનામ્બુદસઙ્કાશં ઇન્દુસુન્દરવિગ્રહમ્ ।
ચક્રં સતારસંયુક્તં મણ્ડલં હૃદિ ભાવયે ।
વિષ્ણુહસ્તે તથા લક્ષ્મીહસ્તે સ્થિતં શુભમ્ ॥ ૧૩૨॥

૫. ૐ ત્રિશૂલાય નમઃ ।
ત્રિશૂલઃ પુરુષો દિવ્યો દ્વિનેત્રશ્ચ કૃતાઞ્જલિઃ ।
જીમૂતસન્નિભો રૌદ્રઃ કિઞ્ચિદ્દંષ્ટ્રો દ્વિબાહુકઃ ।
ત્રિમૂર્તિસ્મારકો યશ્ચ તં વન્દે શિવહસ્તગમ્ ॥ ૧૩૩॥

૬. ૐ દણ્ડાય નમઃ ।
વિદ્યુત્કાન્તિપ્રભં સૂક્ષ્મં દણ્ડં પુરુષરૂપિણમ્ ।
કૃતાઞ્જલિપુટોપેતં કરણ્ડમકુટાન્વિતમ્ ।
સુબ્રહ્મણ્યકરે સંસ્થં ભજે દુષ્ટનિવારકમ્ ॥ ૧૩૪॥

૭. ૐ પદ્માય નમઃ ।
પદ્મં કોશોજ્વલં મૌલિં શઙ્ખકુન્દેન્દુસન્નિભમ્ ।
મહાત્મશક્તિસંયુક્તં સર્વાભરણભૂષિતમ્ ।
પદ્માકારં મહાવિષ્ણુલક્ષ્મીહસ્તસ્થિતં ભજે ॥ ૧૩૫॥

૮. ૐ પાશાય નમઃ ।
પાશઃ સપ્તફણઃ સર્પઃ પુરુષઃ પુચ્છસંયુતઃ ।
કૃતાઞ્જલિપુટોપેતઃ દ્વિભુજશ્ચ દ્વિલોચનઃ ॥

દ્વિજિહ્વ ધર્મરાજસ્ય યમસ્ય વરુણસ્ય ચ ।
કરસ્થઃ કીર્ત્યતે યશ્ચ તં વન્દે દેવરૂપિણમ્ ॥ ૧૩૬॥

૯. ૐ વજ્રાય નમઃ ।
વજ્રં તુ પુરુષાકારં મૃડં કર્કશવિગ્રહમ્ ।
દધત્રિણેત્રં શક્તિં ચ કરણ્ડમકુટાન્વિતમ્ ॥ ૧૩૭॥

૧૦. ૐ શક્તયે નમઃ ।
સ્ત્રીરૂપાં ત્રિગુણાકારાં કિઞ્ચિદ્દંષ્ટ્રાસમન્વિતામ્ ।
દ્વિનેત્રાં દ્વિભુજાં શક્તિં કરણ્ડમકુટાન્વિતામ્ ।
સુબ્રહ્મણ્યકરે સંસ્થાં વન્દે શક્તિપ્રદાયિનીમ્ ॥ ૧૩૮॥

ઇતિ શ્રી ભૃઙ્ગિરિટિસંહિતાયાં પઞ્ચાવરણસ્તોત્રં સમાપ્તમ્ ।

Proofread by Aruna Narayanan

*Shri Natarajarajapanchavarana Stotram*
pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*